श्रीवीतरागाय नमः

तार्किकशिरोमणिश्रीमद्विद्यानन्दस्वामिविरचितं

श्रीपुर-पार्श्वनाथ-स्तोत्रम्

श्रीपंडितकोठियादरबारीलालेन संपादितम्

श्रीवीतरागाय नमः

तार्किकशिरोमणिश्रीमद्विद्यानन्दस्वामिविरचितं

श्रीपुर-पार्श्वनाथ-स्तोत्रम्

(स्रग्धरा)

यः श्रीपादं तवेश श्रयति सपदि सः श्रीपुरं संश्रयेत
स्वामिन् पार्श्वप्रभो त्वत्प्रवचनवचनोद्दीप्रदीपप्रभावैः ।
लब्ध्वा मार्गं निरस्ताऽखिलविपदमतो यत्यधीशैः सुधीभिः
वन्द्यः स्तुत्यो महांस्त्वं विभुरसि जगतामेक एवाऽऽप्तनाथः ॥१॥

अन्ये नाऽऽप्ता विरोधाच्छ्रुतिरपि न ततः कोऽप्ययं वेत्ययुक्तिः
सम्यङ्निर्णीतिबाधाप्रमितिविरहतः कश्चिदेवास्ति वन्द्यः ।
नाशं दोषावृती यत्क्वचिदपि भजतो दृष्टहानिप्रकर्षात्
निःशेषं हेम्नि यद्वन्मलमिति भवतो निष्कलङ्कत्वसिद्धिः ॥२॥

सूक्ष्माद्यर्थः समक्षोऽनुमितिविषयतः कस्यचिद्वाऽनलादिः
स त्वं निर्धूतकर्मक्षितिधरनिवहो दृष्टनिःशेषसत्त्वः ।
न्यायाबाध्याऽगमोर्हन्नसि खलु भवतः सा ह्यनेकान्तदृष्टिः
प्रत्यक्षाद्यैरबाध्या भवति न नियतैकान्तयुक्तिप्रभाढ्या ॥३॥

तावत्प्रत्यक्षमेव प्रथयति तदनेकान्तवादप्रसिद्धिं
यद्वा स्कन्धस्य वर्णाद्यवकरनिचितैकात्मनः स्यात्प्रतीतिः ।
अन्तश्चित्तस्य सौख्याद्यनुमितचिदसङ्कीर्णभावस्य दृष्टेः
सामान्यं वा विशेषो यदि न हि घटतेऽन्योन्यविश्लेष्यवृत्त्या ॥४॥
तदनेकान्तात्मकं यत्सदनुनयवशं सर्वमर्थक्रियाकृत्
प्रमितिप्रव्याप्तरूपं स्फुटनिजविषयाकारसंवित्तिवद्वा ।
अपि वा सिद्धं त्रिकालत्रयसमयगतानन्तपर्यायपुष्यत्
परिणामे तत्प्रतीतात्मनि हृतनियतैकांतिकेऽध्यक्षसिद्धेः ॥५॥

(शार्दूलविक्रीडित)

स्यात्तादात्म्यमुपाश्रितैरधिगतानन्तैर्भविष्यद्भवद्—
भूतैः सत्क्रमयौगपद्यविधिभिर्यत्पर्ययैर्वा गुणैः ।
सङ्कीर्णाङ्गमदद्रवत् द्रवति वा द्रोष्यत्यथो द्रव्यमि—
त्येतद्धर्मिणि धर्मिता तदपरेष्वेवं भवेत्प्रक्रिया ॥६॥

(स्रग्धरा)

नश्यत्युत्पित्सु तावद्भवति नशनवत्स्थास्नु सम्पद्यते वा
स्थास्यत्युत्पत्स्यते सा स्थितिरसकृदलं नङ्क्षति स्थास्यतीत्थम्
नंक्ष्यत्युत्पत्स्यते तन्नशनमपि तथोत्पत्स्यते स्थास्यते य—
न्नंक्ष्यत्युत्पत्तिरेवं त्रिविधमिति भवेत्तत्त्वमर्हन् तवेष्टम् ॥७॥

तदतद्रूपाः पदार्थाः स्वपरविधिदिशाऽपेक्ष्य सर्वस्य सर्वा—
करणात्क्षीराद्यवाप्तिं विदधदिह घटाद्यास्तु नैते पटाद्याः ।
न च पौरस्त्यः स पश्चाद्भवति न च पुरा निर्व्यपेक्षस्वभावः
तदनेकाकारमेकं सदसदभिमतं तादृगेतन्न तादृक् ॥८॥
स्याद्वादे सप्तभङ्गीनयजुषि विधिनिर्द्धारणाभ्यां हि वस्त्वा—
रूढं सत्वेतरात्मक्रमनियमदिशा लक्ष्यतेऽर्थक्रियाकृत् ।
स्वर्णादेर्वा कथञ्चित्सत इह भवति स्यात्स्वरूपान्तराप्तिः
प्रायः पूर्वोत्तराकृत्यपगमजननद्रव्ययुक्तं हि वस्तु ॥९॥

(शार्दूलविक्रीडित)

स्यादस्ति स्वचतुष्टयादितरतः स्यान्नास्त्यपेक्षाक्रमात्
तत्स्यादस्ति च नास्ति चेति युगपत्सा स्यादवक्तव्यता ।
तद्वत्स्यात्पृथगस्ति नास्ति युगपत्स्यादस्तिनास्त्याहिते—
ऽवक्तव्ये गुणमुख्यभावनियतः स्यात्सप्तभङ्गीविधिः ॥१०॥
स्याद्वादः स्वपरावतारविषयेणोद्दीप्तसत्वेतरा—
द्याकाराद्यदनन्तधर्मनिलयस्योच्चैः सतो धर्मिणः ।
सम्यङन्यायबलात्समर्थवदनं यः सप्तभङ्गीनया—
पेक्षः प्रश्नवशाद्विधीतरकृतेरेकत्र निर्बाधतः ॥११॥

सम्यङ्न्यायमतोदयेन सुनयैस्तस्यैकदेशैरथो
निक्षेपैश्च तदर्पणार्पणपरैर्व्यक्तीकृतप्राभवः ।
निःशेषावरणाक्षयक्षणभवत्सर्वार्थसम्पद्विभा—
भाजा नाथ जिन त्वयाऽध्यवसितः स त्वं समाश्रीयसे ॥१२॥

(स्रग्धरा)

जीवः कर्माणि भावः शुभमशुभमतस्तत्फले पुण्यपापे
सौख्यं दुःखं तथा दृक्स्वधिगमचरितान्यागमः शब्दवार्धौ ।
हेयादेयौ प्रमेयः प्रमितिरधिकृतः कालदेशादिमोक्षः
सर्वं सिद्धौ तवैव प्रभवति भगवन् शासनेऽतो भजामः ॥१३॥

(शार्दूलविक्रीडित)

देव श्रीपुरपार्श्वनाथ भुवनाधीशार्च्यपादाम्बुज
प्रध्वस्ताऽखिलकर्मजात विपुलज्ञानप्रभाभासुर ।
श्रेयोमार्गनिदर्शने हि भवता नान्यो विनाऽस्ति क्षमः
तस्माद्वन्द्यपदत्वमेव महतां निःशेषतत्त्वार्थवित् ॥१४॥

(स्रग्धरा)

देवः श्रीमानशेषत्रिदशपरिवृढप्रार्च्यपादारविन्दो
बाह्यान्तर्विग्रहादिप्रभवदतिशयो धर्मतीर्थस्य नाथः ।
इत्येतद्वास्ति मायाविषु सुरविभुषु ख्यातबुद्धादिकेषु
द्वेषाद्यावेशवत्सु प्रतिहतविषयान्योन्यवैताथवाक्षु ॥१५॥

(शिखरिणी)

त्वदन्येऽध्यक्षादिप्रतिहतवचोयुक्तिविषया
विलुप्ताभा लोकव्यपलपनसम्बन्धमनसः ।
भजन्ते नाऽऽप्तत्वं तदिह विदिता वञ्चनकृतिः
विसंवादस्तेषां प्रभवति तदर्थापरिगतेः ॥१६॥

(स्रग्धरा)

नाऽत्यक्षे जैमिनिर्वा श्रुतिसमयबलः सम्यगर्थाविबोधात्
नैतादृक्षस्य दोषावरणविगमनाभावतोऽतीन्द्रियार्थे ।
ज्ञानं श्रुत्या सदर्थावगतिरथ ततः सत्यतेत्येष दोषो
न प्रामाण्यं स्वतोऽस्याः किल घटवदचैतन्यतः सिद्धमेतत् ॥१७॥
आप्तोक्तं चेत्प्रमाणं व्यपनयतु तदर्थावदानान्न साप्ता—
नुक्तेः स्याद्वक्तृदोषो यदि तदपगमान्नैवमित्यप्रतीतिः ।
क्वैवं सिद्धोद्विभागोऽभ्युपगमविगमैः पौरुषेयत्वमन्यत्
वा सुस्थं नैव कर्तृस्मरणविलयनान्नेति नाप्तत्वमन्यत् ॥१८॥

(शार्दूलविक्रीडित)

सुखदुःखादिविचित्रभावनियतेर्नैकस्वभावेश्वरः
प्रभवो नैव भवो न कारणलवात्कार्यस्य नानाकृतिः ।
यवबीजांकुरवत्तथाऽपरिणतेर्नार्थक्रियासम्भवः
स्वभवावस्थितदेशकालिकभिदाभाजां स कर्ता कथम् ॥१९॥

(शार्दूलविक्रीडित)

इच्छा वा नियतेतरा न लभते सम्बन्धमीशेन तत्
कर्मप्राभवतः सुखादिविभवः पर्याप्तमेतेन हि ।
भेत्ता कर्ममहीभृतां सकलविन्नानादिसिद्धस्ततो
यत्कारणादहताच्चपादगदितं तत्स्यात्कथं श्रेयसे ॥२०॥

सत्सर्वं च्चणिकं यदिच्छति पृथक्कालच्चणानां यतः
कार्यं कारणमित्यतश्चिरतरातीतेषु वा वासनाः ।
तच्च क्व च्चितिकर्तृभोक्तृरचनासम्यक्त्वसंज्ञादिकं
जल्पन्सिद्धिपदं विशुद्धधिषणः शौद्धोदनिः स्यात्कुतः ॥२१॥

(स्रग्धरा)

यदयं सर्वत्र सर्वं प्रकृतिरविकृतिः सप्त तस्या विकाराः
महदाद्याः षोडशोच्चैर्गण इति पुरुषस्तद्विकृत्यप्रयुक्तः ।
स्वयमन्यो न प्रभूतिक्रममखिलकलाबन्धहीनस्य जन्तोः
विलपन्मुक्तिः कुतः स्यात्स चपलकपिलो धीमतां देयभावः ॥२२॥

(शार्दूलविक्रीडित)

प्रतिभासे प्रतिभासितार्थविषयं दृश्यं प्रपञ्चे सति
प्रतिबिम्बादि तथा सदेव न हि निष्पर्यायवस्तुस्थितिः ।
ननु कस्यादिगतिं रुणद्धि भुवने सिद्धां क्रियाकारक—
प्रकृतिव्युज्झितसाध्यसाधनगतिर्ब्रह्मा कथं भासते ॥२३॥

(शिखरिणी)

यदेकं वाऽध्यच्चो मितिरिति च निर्वाच्यमखिलं
तथा तत्त्वं चोपप्लुतमिति विचारं न सहते ।
प्रमाणादन्यस्मात्प्रथितवचनाद् युक्तिभजनात्
विना नैतत्सिद्धिर्विधिनियमयोरर्थनियतेः ॥२४॥

(स्रग्धरा)

भावो भावादभावः समयनियमतः सद्विवर्तादसद्वा
ग्राह्योक्तेर्द्वैतमुद्यद्गुणगुणिविवृतेरोघतो द्वैतबुद्धिः ।
नित्यं पूर्वापरान्तात्च्चणिकमनुवृतेरैक्यमन्यत्ववृत्तेः
नानात्वं वृत्तिदोषान्न भवति भगवन् स्यादनेकान्तसिद्धिः ॥२५॥

(मन्दाक्रान्ता)

एषोच्चैर्वाक् तव शिवपदावाप्तिनिःश्रेणिभूता
धीमद्ध्येया जगति जनताऽऽनन्दसन्दानधीरा ।
अस्माद्धातृप्रभृतिवचनाकर्णनाज्जातकम्पा—
ऽशेषप्राणिप्रणयनविधौ जायते या शरण्या ॥२६॥

(हरिगीत)

विदधदतिशयममितमतिमुनिनाथमान्यमनन्यभाङ्
नमितसुररविभुवनपरगुरुतीर्थकृत्त्वसनामयत् ।
उदयपथगततदनुविसृतिरशेषतत्त्वविभासिनी
जयति जिन जिन विजितमनसिज भारती तव भासुरा ॥२७॥

(   )

जय जय जगतीनतश्रीपद श्रीपुरीनिलय
नियतभास्यतारुरायकारुरायपुरायाकर ।
परमपुरुष पार्श्वनाथाधिनाथासनाथाहंस
विनतवर दमाभिरत्नाज रत्नाद्य रत्नात्नय ॥२८॥

(शिखरिणी)

शररायं नाथार्हन् भव भव भवाररायविगति—
च्युतानामस्माकं निरवकरकारुरायनिलय ।
यतोऽगरायात्पुरायाच्चिरतरमपेन्यं तव पदम्
परिप्राप्ता भक्त्या वयमचललक्ष्मीगृहमिदम् ॥२९॥

(शार्दूलविक्रीडित)

एभिः श्रीपुरपार्श्वनाथविलसन्माहात्म्यपुष्यत्सुधा—
ऽऽकूपारो हि निदर्शितः प्रविसर द्वाङ्मार्गचातुर्यतः ।
तस्मात्स्तोत्रमिदं सुरत्नमिव यद्यत्नाद् गृहीतं मया
विद्यानन्दमहोदयाय नियतं धीमद्भिरासेव्यताम् ॥३०॥छ॥

श्रीमद्विद्यानन्दस्वामिने नमो नमः ।